M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 801

Title: Vinayak Sahashra Nama

अ१ा

935

गणेशावतदुसहस्त्रनाम
स्तोत्र ।

विनायक सहस्र नाम

Title : Vināyaka Sahasranama

Author :

Editor :

Year. Vols. :

Publisher :

Remarks :

801

॥ॐ नमः श्रीगणेशाय॥ ॐ देवः पूर्वं पुरारातिः पुरत्रयजयोद्यमे। अनर्चनाद्गणेशस्य जातो विघ्नाकुलः किल॥१॥ म
नसा स विनिर्द्धार्य ततस्तद्विघ्नकारणं। महागणपतिं भक्त्या समभ्यर्च्य यथाविधि॥२॥ विघ्नप्रशमनोपायमपृच्छ
दपरिश्रमं। संतुष्टः पूजनात् शंभोर्महागणपतिः स्वयं॥३॥ सर्वविघ्नप्रशमनं सर्वकामफलप्रदं। ततस्तस्मै स्व
कं नाम्नां सहस्रमिदमब्रवीत्॥४॥ श्रीमहागणपतिरुवाच॥ ॥गणेश्वरो गणक्रीडो गणनाथो गणाधिपः। एक
दंष्ट्रो वक्रतुंडो गजवक्त्रो महोदरः। लंबोदरो धूम्रवर्णो विकटो विघ्ननायकः। सुमुखो दुर्मुखो बुद्धो विघ्नरा
जो घनाघनः॥६॥ भीमः प्रमोदः आमोदः सुरानंदो मदोत्कटः। हेरंबः शंबरः शंभो लंबकर्णो महाबलः॥७॥ नंदनो
लंपटो भीमो मेघनादो गणंजयः। विनायको विरूपाक्षो वीरः शूरो वरप्रदः॥८॥ महागणपतिर्बुद्धिः प्रियः
क्षिप्रप्रसादनः। रुद्रप्रियो गणाध्यक्षो उमापुत्रोऽघनाशनः॥९॥ कुमारगुरुरीशानपुत्रो मूषकवाहनः। सि
द्धिप्रियः सिद्धिपतिः सिद्धिः सिद्धिविनायकः॥१०॥ अविघ्नः तुंबुरुः सिंहवाहनो मोहिनीप्रियः। कटंकटो रा
जपुत्रः शाकलः सम्मितोऽमितः॥११॥ कूष्मांडः सामसंभूतिर्दुर्जयो धूर्जयो जयः। भूपतिर्भुवनपतिर्भूतानां प
तिरव्ययः॥१२॥ विश्वकर्ता विश्वमुखो विश्वरूपो निधिर्गुणः। कविः कवीनामृषभो ब्रह्मण्यो ब्रह्मणस्पतिः॥१३॥

किरीटी कुंडली हारी वनमाली मनोमयः। वैमुख्यहतदैत्यश्रीः पादाहत्या जितक्षितिः॥१४॥ सद्योजातः स्वर्णमुंजमे
खली दुर्निमित्तहृत्। दुःस्वप्नहृत्प्रसहनो गुणी नादप्रतिष्ठितः॥१५॥ सुरूपः सर्वनेत्राधिवासो वि[illegible]न्द
पुरः। पीतांबरः खंडरदः खंडवैशाखसंस्थितः॥१६॥ चित्रांगः श्यामदशनो भालचंद्रो हविर्भुजः। योगाधि
पस्तारकस्थः पुरुषो गजकर्णकः॥१७॥ गणाधिराजो विजयः स्थिरो गजपतिध्वजी। देवदेवः स्मरः प्राणदी
पको वायुकीलकः॥१८॥ विपश्चिद्वरदो नादो नादभिन्नमहाचलः। वराहवदनो मृत्युंजयो व्याघ्राजिनांब
रः॥१९॥ इच्छाशक्तिभवो देवत्राता दैत्यविमर्दनः। शंभुवक्त्रोद्भवः शंभुकोपहा शंभुहास्यभूः॥२०॥ शंभुते
जाः शिवाशोकहारी गौरीसुखावहः। मत्तकायो महानादो गिरिवर्ष्मा शुभाननः॥२१॥ सर्वात्मा सर्वदेवा
त्मा ब्रह्ममूर्द्धा ककुप्श्रुतिः। ब्रह्मांडकुंभश्चिद्व्योमभालः सत्यशिरोरुहः॥२२॥ जगज्जन्मलयोन्मेषनिमेषो
ऽग्न्यर्कसोमदृक्। गिरींद्रैकरदो धर्माधर्मोष्ठः सामबृंहितः॥२३॥ ग्रहर्क्षदशनो वाणीजिह्वो वासवनासिकः।
कुलाचलांसः सोमार्कघंटो रुद्रशिरोधरः॥२४॥ नदीनदभुजः सर्पांगुलीकस्तारकानखः। यमनाभि
श्रीहृदयो मेरुपृष्ठोऽर्णवोदरः॥२५॥ कुक्षिस्थयक्षगंधर्वरक्षःकिन्नरमानुषः। पृथ्वीकटिः सृष्टिलिंगः शैलो

६ [illegible] म

स्थूलश्रीः स्यजानुकः। २६ पातालजंघो मुनिपः कालांगुष्ठस्त्रयीतनुः। ज्योतिर्मंडललांगूलो हृदयालाननिश्चलः। २७
हृत्पद्मकर्णिकाशाली नित्यकेलिसरोवरः। सद्भक्तध्याननिगडः पूजावारीनिवारितः। २८ प्रतापी काश्यपो मंता
गणको विष्टपी बली। यशस्वी धार्मिकस्वोजाः प्रमथः प्रमथेश्वरः। २९ चिंतामणिद्वीपपतिः कल्पद्रुमवनालयः।
रत्नमंडपमध्यस्थो रत्नसिंहासनाश्रयः। ३० तीव्राशिरोद्धृतपदो ज्वालिनीमौलिलालितः। नंदानंदितपीठश्री
र्भोगदो भूषितासनः। ३१ सकामदायिनीपीठः स्फुरदुग्रासनाश्रयः। तेजोवतीशिरोरत्नं सत्यानित्यावतं
सितः। ३२ सविघ्ननाशनीपीठः सर्वशक्त्यंबुजाश्रयः। लिपिपद्मासनाधारो वह्निधामत्रयालयः। ३३ उन्न
तः प्रपदो गूढगुल्फः संवृतपार्ष्णिकः। पीनजंघः श्लिष्टजानुः स्थूलोरुः प्रोन्नमत्कटिः। ३४ निम्ननाभिः स्थूल
कुक्षिः पीनवक्षो बृहद्भुजः। पीनस्कंधः कंबुकंठो लंबोष्ठो लंबनासिकः। ३५ भग्नवामरदः तुंगसव्यदं
तो महाहनुः। ह्रस्वनेत्रत्रयः शूर्पकर्णो निविडमस्तकः। ३६ स्तबकाकारकुंभाग्रो रत्नमौलिर्निरंकुशः।
सर्पहारकटीसूत्रः सर्पयज्ञोपवीतवान्। ३७ सर्पकोटीरकटकः सर्पग्रैवेयकांगदः। सर्पकक्षोदराबंधः बृ
सर्पराजोत्तरीयकः। ३८ रक्तो रक्तांबरधरो रक्तमाल्यविभूषणः। रक्तेक्षणो रक्तकरो रक्ततालोष्ठपल्लवः। ३९

श्वेतः श्वेतांबरधरः श्वेतमाल्यविभूषणः। श्वेतातपत्ररुचिरः श्वेतचामरवीजितः। ४० सर्वावयवसंपू
र्णः सर्वलक्षणलक्षितः। सर्वाभरणशोभाढ्यः सर्वशोभासमन्वितः। ४१ सर्वमंगलमांगल्यः सर्वका
रणकारणं। सर्वदैवकरः शार्ङ्गी बीजपूरी गदाधरः। ४२ इक्षुचापधरः शूली चक्रपाणिः सरोजभृत्। किरी
टी कुंडली हारी वनमाली [illegible]। ४३ पाशी धृतोत्पलः शालिमंजरीभृत्स्वदंतभृत्। कल्पवल्लीधरो विश्वाभ
यदैककरो वशी। ४४ अक्षमालाधरो ज्ञानमुद्रावान् मुद्गरायुधः। पूर्णपात्री कंबुधरो विधृतालिः समुद्गकः। ४५
करस्थाम्रफलश्चूतकलिकाभृत्कुठारवान्। पुष्करस्थस्वर्णघटीपूर्णरत्नाभिवर्षकः। ४६ भारतीसुंदरी
ग्र प ५ नाथो विनायकरतिप्रियः। महालक्ष्मीतमः सिद्धलक्ष्मीमनोरमः। ४७ रमारमेशपूर्वांगो दक्षिणोमाम
हेश्वरः। महीवराहवामांगो रतिकंदर्पपश्चिमः। ४८ आमोदमोदजननः सप्रमोदः प्रमोदनः। संमेधित
समृद्धिश्रीः ऋद्धिसिद्धिप्रवर्द्धनः। ४९ दंतसौमुख्यसुमुखः कांतिकंदलिताश्रयः। मदनावत्याश्रितांघ्रिः कृ
तासौमुख्यदुर्मुखः। ५० विघ्नसंपल्लवोपघ्नः सेवोन्निद्रमदद्रवः। विघ्नकृन्निघ्नचरणो द्रावणीशक्तिसत्कृ
तः। ५१ तीव्राप्रसन्ननयनो ज्वालिनीपालितैकदृक्। मोहिनीमोहनो भोगदायिनीकांतिमंडनः। ५२

मिनीकांतिवल्लभः श्रीरैद्धितवक्षकंधरः ॥ वसुधारामदोन्मादो महाशंखनिधिःप्रभुः ॥५५॥ नमद्वसुमतीमौ
लिमहापद्मनिधिःप्रभुः ॥ सर्वसद्गुरुसंसेव्यः शोचिष्केशहृदाश्रयः ॥५६॥ ईशानमूर्द्धा देवेंद्रशिखः पव
नंदनः ॥ प्रत्यग्रनयनो दिव्यो दिव्यास्त्रशतपर्वधृक् ॥ ऐरावतादिसर्वाशावारणो वारणप्रियः ॥ व
ज्राद्यस्त्रपरीवारो विजयो विजयावहः ॥५७॥ अजय्यार्चितपादाब्जो नित्यो नित्यावलंबनः ॥ विलासिनी
कृतोल्लासः शौंडीर्यधैर्यमंडितः ॥५८॥ अनंतानंतसुखदः सुमंगलसुमंगलः ॥ ज्ञानाश्रयः क्रियाधा
र इच्छाशक्तिनिषेवितः ॥५९॥ सुभगासंश्रितपदो ललिताललिताश्रयः ॥ कामिनीपालनः कामकामि
नीकेलिलालितः ॥६०॥ सरस्वत्याश्रयो गौरीनंदनः श्रीनिकेतनः ॥ गुरुगुप्तपदो वाचासिद्धो वागीश्व
रीपतिः ॥६१॥ नलिनीकामुको वामारामो ज्येष्ठामनोरमः ॥ रौद्रीमुद्रितपादाब्जो हुंबीजस्तुंगशक्ति
कः ॥ ह्रीं विश्वनीबीजस्वस्मलः स्वाहाशक्तिः सकीलकः ॥ अमृताब्धिकृतावासो मदघूर्णितलोच
नः ॥६२॥ उच्छिष्टगणउच्छिष्टगणेशो गणनायकः ॥ सार्वकालिकसंसिद्धिर्नित्यशैवो दिगंबरः ॥६३॥
अनपायोऽनंतदृष्टिरप्रमेयोऽजरोमरः ॥ अनाविलोऽप्रतिरथो ह्यच्युतोऽमृतमक्षरं ॥६४॥ अप्रतर्क्यो

क्षयोऽजय्योऽनाधारोऽनामयोऽमलः ॥ अमोघसिद्धिरद्वैतमघोरोऽप्रमिताननः ॥६५॥ अनाकारोऽब्धिभूम्यग्निब
लघ्नोऽव्यक्तलक्षणः ॥ आधारपीठ आधार आधाराधेयवर्जितः ॥६६॥ आखुकेतन आशापूरक आखु
महारथः ॥ इक्षुसागरमध्यस्थ इक्षुभक्षणलालसः ॥६७॥ इक्षुचापातिरेकश्रीरिक्षुचापनिषेवि
तः ॥ इंद्रगोपसमानश्रीरिंद्रनीलसमद्युतिः ॥६८॥ इंदीवरदलश्याम इंदुमंडलनिर्मलः ॥ इध्मप्रिय
इडाभाग इडाधामेंदिराप्रदः ॥६९॥ इक्ष्वाकुविघ्नविध्वंसी इतिकर्तव्यतेप्सितः ॥ ईशानमौलिरी
शान ईशानप्रिय ईतिहा ॥७०॥ ईषणात्रयकल्पांत ईहामात्रविवर्जितः ॥ उपेंद्र उडुभृन्मौलिरुंडेर
करतिप्रियः ॥७१॥ उन्नतानन उत्तुंग उदारस्त्रिदशाग्रणीः ॥ ऊर्जस्वानूष्मलमद ऊहापोहदुरास
दः ॥७२॥ ऋग्यजुःसामसंभूतिरृद्धिसिद्धिसमर्पकः ॥ ऋजुचित्तैकसुलभो ऋणत्रयविमोचनः ॥७३॥
लुप्तविघ्नः स्वभक्तानां लुप्तशक्तिः सुरद्विषां ॥ लुप्तश्रीर्विमुखार्चानां लूताविस्फोटनाशनः ॥७४॥ एका
रपीठमध्यस्थ एकपादकृतासनः ॥ एजिताखिलदैत्यश्रीरेधिताखिलसंश्रितः ॥७५॥ ऐश्वर्यनिधिरै
श्वर्यमैहिकामुष्मिकप्रदः ॥ ऐरंमदसमोन्मेष ऐरावतसमाननः ॥७६॥ ओंकारवाच्य ओंकार ओजस्वानो

अंकुशः सुरनागानामंकुशः करसंस्थितः।१

षधीपतिः। अद्यायुर्निधिरौद्रश्चन्द्रो येअन्नत्यनिःस्पृहः।७६ कमण्डलुधरः कल्पः कपर्दी कलभाननः।
कर्मसाक्षी कर्मकर्त्ता कर्माकर्मफलप्रदः।७७ कदम्बगोलकाकारः कूष्माण्डगणनायकः। कारुण्यदे
हः कपिलः कथकः कटिसूत्रभृत्।७८ खर्वः खड्गप्रियः खड्गी खातान्तस्थः खनिर्मलः। खल्वाटशृंगनिल
थो यः खट्वांगी खदुरासदः।७९ गुणाढ्यो गहनो गस्थो गद्यपद्यसुधार्णवः। गद्यगानप्रियो गर्जो गीतगीर्वा
णपूर्वजः।८० गुह्याचाररतो गुह्यो गुह्यागमनिरूपितः। गुहाशयो गुहाब्धिस्थो गुरुगम्यो गुरोर्गुरुः।८१
घण्टाघर्घरिकामाली घटकुम्भो घटोदरः। चण्डश्चण्डेश्वरः सुहृच्चण्डेशश्चण्डविक्रमः।८२ चराचरपिता चिन्ता
मणिश्चर्वणलालसः। छन्दश्छन्दोद्भवश्छन्दो दुर्लक्ष्यश्छन्दविग्रहः।८३ जगद्योनिर्जगत्साक्षी जगदीशो ज
गन्मयः। जपो जपपरो जप्यो जिह्वासिंहासनप्रभुः।८४ झलज्झल्लोल्लसद्दामझंकारिभ्रमराकुलः। टं
कारस्फारसंरावष्टंकारमणिनूपुरः।८५ ठद्वयीपल्लवान्तस्थसर्वमंगलदायकः। डिण्डिमुण्डो डाकिनीशो
डामरो डिण्डिमप्रियः।८६ ढक्कानिनादमुदितो ढौंको ... त्सरो डावालिमेखलः। ढक्कानिनादमुदितो ढौंको ४
ढुण्ढिविनायकः।८७ तत्त्वानां प्रकृतिस्तत्त्वं तत्त्वंपदनिरूपितः। तारकान्तरसंस्थानस्तारकस्तारकान्तकः।८८

व हृद्गुणो ग्र २

नाप्रिय

दक्षयज्ञप्रमथनो दाता दानं दमो दया। स्थाणुः स्थिरः स्थाता स्थावरजंगमं जगत्।९९ दयावान् दि
व्यविभवो दण्डभृद्दण्डनायकः। दन्तप्रभिन्नाभ्रमालो दैत्यवारणदारणः।१०० दंष्ट्रालग्नद्वीपघटो देवार्थनृ
थो गजाकृतिः। धनं धनपतिर्धन्यो धनदो धरणीधरः।१०१ ध्यानैकप्रकटो ध्येयो ध्यानं ध्यानपरायणः। नंद्यो नंदि
प्रियो नादो नादमध्यप्रतिष्ठितः।१०२ निष्कलो निर्मलो नित्यो नित्यानित्यो निरामयः। परं व्योम परं धाम प
रमात्मा परं पदं।१०३ परात्परः पशुपतिः पशुपाशविमोचनः। पूर्णानन्दः परानन्दः पुराणपुरुषोत्तमः।१०४
पद्मप्रसन्ननयनः प्रणताज्ञाननाशनः। प्रमाणप्रत्ययातीतः प्रणतार्तिनिवारणः।१०५ फलहस्तः फणि
पतिः फेत्कारः फाणितप्रियः। बाणार्चिताङ्घ्रियुगलो बालकेलिकुतूहली।१०६ ब्रह्म ब्रह्मार्चितपदो ब्रह्मचा
री बृहस्पतिः। बृहत्तमो ब्रह्मपरो ब्रह्मण्यो ब्रह्मवित्प्रियः।१०७ बृहत्क्षेपदत्तलक्ष्मीको भर्गो भद्रो भयापहः।
भगवान् भक्तिसुलभो भूतिदो भूतिभूषणः।१०८ भव्यो भूतालयो भोगदाता भ्रूमध्यगोचरः। मन्त्रो मन्त्रप
तिर्मन्त्री मदमत्तो मनोरमः।१०९ मेखलावान् मन्दगतिर्मतिमान् कमलेक्षणः। महाबलो महावीर्यो
महाप्राणो महामनाः।११० यज्ञो यज्ञपतिर्यज्ञगोप्ता यज्ञफलप्रदः।१११ यशस्करो योगगम्यो याज्ञिको याजकप्रियः

यौवक्रप्रियः।रसोरसप्रियोरस्योरंजकोरावणार्चितः।रक्षौरक्षौकरोरत्नगर्भोराज्यसुखप्रदः।३लक्ष
दे लक्षप्रदोलक्ष्योलयस्थोलड्डुकप्रियः।लानप्रियोलास्यपरोलाभकृल्लोकविश्रुतः।४वरेण्योवह्नि
वदनोवंद्योवेदांतगोचरः।विकर्त्ताविश्वतश्चक्षुर्विधाताविश्वतोमुखः।५वामदेवोविश्वनेतावज्रिवज्रिव
ज्रनिवारणः।विश्वबंधनविष्कंभाधारोविश्वेश्वरप्रभुः।६शब्दब्रह्मशमप्राप्यःशंभुशक्तिगणेश्वरः।
शास्ताशिखाग्रनिलयःशरण्यःशिखरेश्वरः।७षड्ऋतुकुसुमस्रग्वीषडाधारःषडक्षरः।संसारवैद्यःस
र्वज्ञःसर्वभेषजभेषजं।८सृष्टिस्थितिलयक्रीडःसुरकुंजरभेदिनः।सिंदूरितमहाकुंभःसदसद्व्यक्ति
दायकः।९साक्षीसमुद्रमथनःस्वसंवेद्यःस्वदक्षिणः।स्वतंत्रःसत्यसंकल्पःसामगानरतःसुखी।
हंसोहस्तिपिशाचीशोहवनंहव्यकव्यभुक्।हव्यंहुतप्रियोहृष्टोहृल्लेखामंत्रमध्यगः।क्षेत्राधिपःक्षमा
भर्त्ताक्षमापरपरायणः।११क्षिप्रक्षेमकरःक्षेमानंदःक्षोणीसुरद्रुमः।धर्मप्रदोर्थदःकामदातासौ
भाग्यवर्द्धनः।१२विद्याप्रदोविभवदोभुक्तिमुक्तिफलप्रदः।आभिरूप्यकरोवीरश्रीप्रदोविजयप्रदः।
१३सर्ववश्यकरोगर्भदोषहापुत्रपौत्रदः।मेधादःकीर्त्तिदःशोकहारीदौर्भाग्यनाशनः।१४प्रतिवादिमुख ५

स्तंभोरुष्टचित्तप्रसादनः।पराभिचारशमनोदुःखबंधनमोचकः।१५लवस्त्रुटिःकलाकाष्ठानिमेषस्त
त्परक्षणः।घटीमुहूर्त्तःप्रहरोदिवानक्तमहर्निशं।१६पक्षोमासोयनंवर्षंयुगंकल्पोमहालयः।राशि
स्तारातिथिर्योगोवारःकरणमंशकः।१७लग्नंहोराकालचक्रंमेरुःसप्तर्षयोध्रुवः।राहुर्मंदःकविर्जी
वोबुधोभौमःशशीरविः।१८कालःसृष्टिःस्थितिर्विश्वंस्थावरंजंगमंजगत्।भूरापोग्निर्मरुद्व्योमाहं
कृतिःप्रकृतिःपुमान्।१९ब्रह्माविष्णुःशिवोरुद्रईशःशक्तिःसदाशिवः।त्रिदशाःपितरःसिद्धायक्षारक्षां
सिकिंनराः।२०सिद्धविद्याधराभूतामनुष्याःपशवःखगाः।समुद्राःसरितःशैलाभूतंभव्यंभवोद्भवः।
सांख्यंपातंजलंयोगःपुराणानिश्रुतिस्मृतिः।वेदांगानिसदाचारोमीमांसान्यायविस्तरः।२२आयु
र्वेदोधनुर्वेदोगांधर्वंकाव्यनाटकं।वैखानसंभागवतंसात्वतंपांचरात्रिकं।२३शैवंपाशुपतंकालामु
खंभैरवशासनं।शाक्तंवैनायकंसौरंजैनमार्हतसंहिता।२४सदसद्व्यक्तमव्यक्तंसचेत
नमचेतनं।बंधोमोक्षःसुखंभोगोयोगःसत्यमणुर्महान्।२५स्वस्तिहुंफट्स्वधास्वाहाश्रौषट्वौ
षट्वषण्नमः।ज्ञानंविज्ञानमानंदोबोधःसंवित्समोसमः।२६एकएकाक्षराधारएकाक्षरपरायणः।
वष्कमः

एकाग्रधीरेकवीर एकानेकस्वरूपधृक् । २७ द्विरूपो द्विभुजो द्व्यक्षो द्विरदो द्वीपरक्षकः । द्वैमातुरो द्विवदनो
द्वंद्वहीनो द्वयातिगः । २८ त्रिधामा त्रिकरस्त्रेता त्रिवर्गफलदायकः । त्रिगुणात्मा त्रिलोकादिस्त्रिशक्तीशस्त्रि
लोचनः । २९ चतुर्बाहुश्चतुर्दन्तश्चतुरात्मा चतुर्मुखः । चतुर्विधोपायमयश्चतुर्वर्णाश्रमाश्रयः । ३० चतु
र्विधवचोवृत्तिपरिवृत्तिप्रवर्तकः । चतुर्थीपूजनप्रीतश्चतुर्थीतिथिसंभवः । ३१ पंचाक्षरात्मा पंचात्मा
पंचास्यः पंचकृत्यकृत् । पंचाधारः पंचवर्णः पंचाक्षरपरायणः । ३२ पंचभक्ष्यप्रियः पंचबाणः पंचशि
वात्मकः । षट्कोणपीठः षट्चक्रधामा षड्ग्रंथिभेदकः । ३३ पंचतालः पंचकरः पंचप्रणवभावितः । पंचब्र
ह्ममयस्फूर्तिः पंचावरणवारितः । ३४ षण्मुखः षण्मुखभ्राता षट्शक्तिपरिवारितः । षड्वैरिवर्गवि
ध्वंसी षडूर्मिभयभंजनः । ३५ षट्तर्कदूरः षट्कर्मा षड्गुणः षड्रसाश्रयः । षडध्वध्वांतविध्वंसी षडंगु
लमहाह्रदः । ३६ सप्तपातालचरणः सप्तद्वीपोरुमंडलः । सप्तस्वर्लोकमुकुटः सप्तसप्तिवरप्रदः । ३७ स
ग प्तांगराज्यसुखदः सप्तर्षिगणवंदितः । सप्तच्छंदोनिधिः सप्तहोत्रः सप्तस्वराश्रयः । ३८ सप्ताब्धिकेलिकासा ६
रः सप्तमातृनिषेवितः । ३९ सप्तच्छंदो मोदमदः सप्तच्छंदो मखप्रभुः । ४० अष्टमूर्तिर्ध्येयमूर्तिरष्टप्रकृतिकार

षट्कोणपीठः षट्चक्रधामा षड्ग्रंथिभेदकः

णम् । अष्टांगयोगफलभृदष्टपत्रांबुजासनः । ४१ अष्टशक्तिसमृद्धश्रीरष्टैश्वर्यप्रदायकः । अष्टपीठोपपीठ
श्रीरष्टमातृसमावृतः । ४२ अष्टभैरवसेव्योऽष्टवसुवंद्योऽष्टमूर्तिभृत् । अष्टचक्रस्फुरन्मूर्तिरष्टद्रव्यहविःप्रि
यः । ४३ नवनागासनाध्यासी नवनिध्यनुशासिता । नवद्वारपुराधारो नवाधारनिकेतनः । ४४ नवनारा
यणस्तुत्यो नवदुर्गानिषेवितः । नवनाथमहानाथो नवनागविभूषणः । ४५ नवरत्नविचित्रांगो नवश
क्तिशिरोधृतः । दशात्मको दशभुजो दशदिक्पतिवंदितः । ४६ दशाध्यायो दशप्राणो दशेंद्रियनियामकः । द
शाक्षरमहामंत्रो दशाशाव्यापिविग्रहः । ४७ एकादशादिभीरुद्रैः स्तुत एकादशाक्षरः । द्वादशोद्दंडदोर्दंडो द्वा
दशांतनिकेतनः । त्रयोदशाभिदाभिन्नविश्वेदेवाधिदैवतः । ४८ चतुर्दशेंद्रवरदश्चतुर्दशमनुप्रभुः । चतुर्दशा ग
ग दिविद्याढ्यश्चतुर्दशजगत्पतिः । ४९ सामपंचदशः पंचदशीशीतांशुनिर्मलः । षोडशाधारनिलयः षोडशस्व
रमातृकः । ५० षोडशांतपदावासः षोडशेंदुकलात्मकः । कलासप्तदशी सप्तदशः सप्तदशाक्षरः । ५१
अष्टादशद्वीपपतिरष्टादशपुराणकृत् । अष्टादशौषधीसृष्टिरष्टादशविधिः स्मृतः । ५२ अष्टादश
लिपिव्यष्टिसमष्टिज्ञानकोविदः । एकविंशः पुमानेकविंशत्यंगुलिपल्लवः । ५३ चतुर्विंशतितत्त्वात्मा पंच

विंशाख्यष्टरूपधः सप्तविंशतितारेशः सप्तविंशतियोगकृत् ।[illegible]। द्वात्रिंशद्भैरवाधीशश्चतुस्त्रिंशन्महाह्र
दः ।षट्त्रिंशत्तत्वसंभूतिरष्टत्रिंशकलातनुः ।[illegible]। नमदेकोनपंचाशन्मरुद्वर्गो निरर्गलः ।पंचाशदक्ष रा
रश्रेणीपंचाशद्रुद्रविग्रहः ।[illegible]। पंचाशद्विष्णुशक्तीशः पंचाशन्मातृकालयः ।द्विपंचाशद्वपुःश्रेणीत्रिष
ष्ट्यक्षरसंश्रयः ।[illegible]। चतुःषष्टिमहासिद्धियोगिनीवृंदवंदितः ।चतुःषष्ट्यर्णनिर्णेता चतुःषष्टिक
लानिधिः ।[illegible]। अष्टषष्टिमहातीर्थक्षेत्रभैरवभावनः ।चतुर्नवतिमंत्रात्मा षण्णवत्यधिकप्रभुः ।[illegible]।
शतानंदः शतधृतिः शतपत्रायतेक्षणः ।शतानीकः शतमखः शतधारावरायुधः ।[illegible]। सहस्रपत्र
निलयः सहस्रफणिभूषणः ।सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।[illegible]। सहस्रनामसं
स्तुत्यः सहस्राक्षबलापहः ।दशसाहस्रफणिभृत्फणिराजकृतासनः ।[illegible]। अष्टाशीतिसहस्राद्यम
९ हर्षिस्तोत्रपाठितः ।लक्षाधारः प्रियाधारो लक्षाधारमनोमयः ।[illegible]। चतुर्लक्षजपप्रीतश्चतुर्लक्षप्रका
शितः ।कोटिसूर्यप्रतीकाशः कोटिचंद्रांशुनिर्मलः ।[illegible]। शिवोद्भवाद्यष्टकोटिविनायकधुरंधरः ।सप्तको ७
टिमहामंत्रमंत्रितावयवद्युतिः ।[illegible]। त्रयस्त्रिंशत्कोटिसुरश्रेणीप्रणतपादुकः ।अनंतनामानंतश्रीर

तिश्रीयंत्रायं जप्यते स्तवः ।[illegible]। हृदयरुक्प्रमेहार्शोभगंदरविषूचिकाः ।गुल्मं प्लीहानमश्मानमतीसा
रं महोदरं ।[illegible]। कासं श्वासमुदावर्तं शूलशोफामयोदरं ।शिरोरोगं वमिं हिक्कां गंडमालामरोचकं ।[illegible]।
वातपित्तकफद्वंद्वत्रिदोषजनितज्वरं ।आगंतुविषमं शीतमुष्णं चैकाहिकादिकं ।[illegible]। इत्याद्युक्तमनुक्तं वा
रोगं दोषादिसंभवं सर्वं प्रशमयत्याशु स्तोत्रस्यास्य सकृज्जपात् ।[illegible]। सकृत्पाठेन संसिद्धः स्त्रीशूद्र
पतितैरपि ।सहस्रनाममंत्रोयं जपितव्यः शुभाप्तये ।[illegible]। महागणपतेः स्तोत्रं सकामः प्रजपन्निदं
उपे इच्छया सकलान्भोगानुपभुज्येह पार्थिवान् ।[illegible]। मनोरथफलैर्दिव्यैर्व्योमयानैर्मनोरमैः ।चंद्रेंद्र
भास्करोपेंद्रब्रह्मशर्वादिसद्मसु ।[illegible]। कामरूपः कामगतिः कामतश्चवरन्निदा ।भुक्त्वा यथेप्सिता
न्भोगानभीष्टैः सहबंधुभिः ।[illegible]। गणेशानुचरो भूत्वा महागणपतिप्रियः ।नंदीश्वरादिसानंद
नंदितः सकलैर्गणैः ।[illegible]। शिवाभ्यां कृपया पुत्रनिर्विशेषं च लालितः ।शिवभक्तः पूर्णकामो गणे ८
रा मुनः। श्वरवरात्पुनः ।[illegible]। जातिस्मरो धर्मपरः सार्वभौमोभिजायते ।निष्कामस्तु जपन्नित्यं भक्त्या विघ्नेशत
त्परः ।[illegible]। योगसिद्धिं परां प्राप्य ज्ञानवैराग्यसंस्थितः ।निरंतरोदितानंदे परमानंदसंविदि ।[illegible]। विश्वोत्ती
८

801

नंतौ नंतसौख्यदः ॥ ६६ ॥ नाम श्रीदूतिवैनायकं नाम्नां सहस्रमिदमीरितं ॥ इदं ब्राह्मे मुहूर्ते यः पठति प्रत्य
हं नरः ॥ ६७ ॥ करस्थं तस्य सकलमैहिकामुष्मिकं सुखं ॥ आयुरारोग्यमैश्वर्यं धर्मं शौर्यं बलं यशः ॥ ६८ ॥ मे
धा प्रज्ञा धृतिः कांतिः सौभाग्यमभिरूपता ॥ सत्यं दया क्षमा शांतिर्दाक्षिण्यं धर्मशीलता ॥ ६९ ॥ जगत्संवननं
विश्वसंवादो वेदपाटवं ॥ सभापांडित्यमौदार्यं गांभीर्यं ब्रह्मवर्चसं ॥ ७० ॥ ओजस्तेजः कुलं शीलं प्रतापो वी
र्यमार्यता ॥ ज्ञानं विज्ञानमास्तिक्यं स्थैर्यं विश्वातिशायिता ॥ ७१ ॥ धनधान्यादिवृद्धिश्च सकृदस्य जपाद्भवेत् ॥
वश्यं चतुर्विधं विश्वं जपादस्य प्रजायते ॥ ७२ ॥ राज्ञो राजकलत्रस्य राजपुत्रस्य मंत्रिणः ॥ जप्यते यस्य वश्या
र्थं स दासस्तस्य जायते ॥ ७३ ॥ धर्मार्थकाममोक्षाणामनायासेन साधनं ॥ शाकिनीडाकिनीरक्षोयक्षोरगभ ग
यापहं ॥ ७४ ॥ साम्राज्यसुखदं चैव समस्तरिपुमर्दनं ॥ समस्तकलहध्वंसी दग्धबीजप्ररोहणं ॥ ७५ ॥ दुः
स्वप्ननाशनं क्रुद्धस्वामिचित्तप्रसादनं ॥ षड्वर्गाष्टमहासिद्धित्रिकालज्ञानकारणं ॥ ७६ ॥ परकृत्यप्र
शमनं परचक्रविमर्दनं ॥ संग्रामरंगे सर्वेषामिदमेकं जयावहं ॥ ७७ ॥ सर्ववंध्यात्वदोषघ्नं गर्भरक्षैक च
कारणं ॥ पठ्यते प्रत्यहं यत्र स्तोत्रं गणपतेरिदं ॥ ७८ ॥ देशे तत्र न दुर्भिक्षमीतयो दुरितानि च ॥ न तद्गेहं जहा

।६६।

पा६

ति परेशस्य लक्ष्मीर्यस्य नरास्ति वर्जिता ॥ लीनो वैनायके धाम्नि रमते नित्यनिर्वृतः ॥ ७९ ॥ इदं प्रजप्तं पठितं पाठितं
श्रावितं श्रुतं ॥ व्याकृतं चर्चितं ध्यातं विमृष्टमभिवंदितं ॥ ८० ॥ इहामुत्र च सर्वेषां विश्वैश्वर्यप्रदायकं ॥
स्वच्छंदचारिणा येषां येनासौ धार्यते स्तवः ॥ ८१ ॥ स रक्ष्यते शिवोद्भूतैर्गणैरध्यर्धकोटिभिः ॥ लिखितं
पुस्तके स्तोत्रं दृष्ट्वा यत्र प्रपूज्यते ॥ ८२ ॥ तत्र सर्वोत्तमा लक्ष्मीः सन्निधत्ते निरंतरं ॥ ८३ ॥ दानैरशेषैर
खिलैर्व्रतैश्च तीर्थैरशेषैरखिलैर्मखैश्च ॥ न तत्फलं विंदति यद्गणेशसहस्रनामस्मरणेन
सद्यः ॥ ८४ ॥ एतन्नाम्नां सहस्रं पठति दिनमणौ प्रत्यहं प्रोज्जिहाने ॥ सायं मध्यंदिने वा त्रिषवणम
थवा संततं वा जनो यः ॥ ८५ ॥ स स्यादैश्वर्यधुर्यः प्रभवति वचसां कीर्तिमुच्चैस्तनोति ॥ दारिद्र्यं
हंति विश्वं वशयति सुचिरं वर्द्धते पुत्रपौत्रैः ॥ ८६ ॥ दरिद्रतां समुन्मूल्य सप्तजन्मानुगामपि ल
भते महतीं लक्ष्मीमित्याज्ञा पारमेश्वरी ॥ १०० ॥ आयुष्यं वीतरोगं कुलमतिविमलं संपदश्चार्तिनाशः
कीर्तिर्नित्यावदाता भणितिरभिनवा कांतिरव्याजभव्या ॥ पुत्राः संतः कलत्रं गुणवदभिमतं
यद्यदेतच्च तथ्यं नित्यं यः स्तोत्रमेतत्पठति गणपतेस्तस्य हस्ते समस्तं ॥ गणंजयो गणपति

हेरंबो धरणीधरः ॥ महागणपतिर्लक्षेश्वरः द्विजप्रसादनः ॥ अमोघसिद्धिरमृतं निरयश्चिंताम
णिर्निधिः ॥ सुमंगलो बीजमिच्छापूरकोवरदः ... ॥ कश्यपोनंदनो वाचासिद्धो ढुंढविनायकः ॥
मोदकैरेभिरत्रैकः विंशत्या नामभिः पुमान् ॥ यः स्तौति मद्गतमना मदाराधनतत्परः ॥ स्तुतो नाम्नां
सहस्रेण तेनाहं नात्र संशयः ॥ नमो नमः सुरवरपूजितांघ्रये नमो नमो निरुपममंगलात्मने ॥
नमो नमो विपुलदयैकसिद्धये नमो नमः करिकलभाननाय ते ॥ किंकरीकोटिकांगणानां कृतकरु
णामयुत ... लश्चंद्रमौलिर्नेत्रैर्युक्तः ... निर्वो मम करचरणो बीजपूरान्तनासः ॥ हस्ताग्रात्तरू
पपाशांकुशावरदहस्तो नागवक्त्रोभिरूपो देवः पद्मासनो नो भवतु सुखकरो भूतये विघ्नरा
जः ॥१॥ इति श्रीवह्निपुराणे महागणपतिप्रोक्तं श्रीगणेशवरदसहस्रनामस्तोत्रं संपूर्णं स
माप्तं ॥ ॥श्रीरस्तु॥ ॥शुभं भवतु॥ ॥कल्याणमस्तु॥ ॥संवत् १९२९ वर्षे मासा उत्तमे ... दि
१७ ... लिखितमिदं ॥ ॥यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ॥ यदि शुद्धमशुद्धं वा मम
दोषो न दीयते ॥१॥